# पञ्चामृत स्नानाभिषेकम्

## क्षीराभिषेकं

आप्या॑यस्व॒ समे॑तु ते वि॒श्वत॑स्सोम॒वृष्णि॑यम् । भवा॒वाज॑स्य सङ्ग॒धे ॥
क्षीरेण स्नपयामि ॥

## दध्याभिषेकं

द॒धि॒क्राव्ण्णो॑ अ॒कारि॑षं जि॒ष्णोरश्व॑स्य वा॒जिनः॑ । सु॒र॒भिनो॒ मुखा॑कर॒त्प्रण॒
आयू॑ग्ं॒षितारिषत् ॥ दध्ना स्नपयामि ॥

## आज्याभिषेकं

शु॒क्रम॑सि॒ ज्योति॑रसि॒ तेजो॑ऽसि दे॒वोव॑स्स॒वितो॒त्पु॑ना॒ त्वच्छि॑द्रेण प॒वित्रे॑ण॒
वसो॒ स्सूर्य॑स्य र॒श्मिभिः॑ ॥ आज्येन स्नपयामि ॥

## मधु अभिषेकं

मधु॒वाता॑ ऋतायते मधु॒क्षरन्ति॒ सिन्ध॑वः । माध्वी॑र्नस्स॒न्त्वोष॑धीः ।
मधु॒नक्त॑ मु॒तोष॑सि॒ मधु॑म॒त्पार्थि॑व॒ग्ं॒ रजः॑ । मधु॒द्यौर॑स्तु॒ नः पि॒ता ।
मधु॑मान्नो॒ वन॒स्पति॒र्मधु॑माग्म् अस्तु॒ सूर्यः॑ । माध्वी॒र्गावो॑ भवन्तु नः ॥
मधुना स्नपयामि ॥

## शर्कराभिषेकं

स्वा॒दुः पव॑स्व दि॒व्याय॒ जन्म॑ने स्वा॒दुरिन्द्रा॑य सु॒हवी॑तु॒ नाम्ने॑ ।
स्वा॒दुर्मि॒त्राय॒ वरु॑णाय वा॒यवे॒ बृ॒हस्पत॑ये॒ मधु॑मा॒ग्म् अदा॑भ्यः ॥ शर्करया
स्नपयामि ॥

याः फलिनीर्या अफला अपुष्पायाश्च पुष्पिणीः । बृहस्पति
प्रसूतास्तानो मुञ्चस्त्वगं हसः ॥ फलोदकेन स्नपयामि ॥

**शुद्धोदक अभिषेकं**

ॐ आपो हिष्ठा मयोभुवः । ता न ऊर्जे दधातन । महेरणाय चक्षसे । यो वः शिवतमो रसः । तस्य भाजयते ह नः । उषतीरिव मातरः । तस्मा अरङ्ग माम वः । यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥ इति पञ्चामृतेन स्नापयित्वा ॥

Web Url: http://www.vignanam.org/veda/panchamruta-snanam-devanagari.html